National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(62): 71-73
© 2025 NJHSR
www.sanskritarticle.com

शालिनी कुमारी
शोधच्छात्रा, सर्वदर्शनविभागः,
श्रीलालबहादुरशास्त्रीकेन्द्रीयसंस्कृत-
विश्वविद्यालयः, नई दिल्ली

Correspondence:
शालिनी कुमारी
शोधच्छात्रा, सर्वदर्शनविभागः,
श्रीलालबहादुरशास्त्रीकेन्द्रीयसंस्कृत-
विश्वविद्यालयः, नई दिल्ली

# भारतीयज्ञानपरम्परायां न्यायशास्त्रस्य वैशिष्ट्यम्।

**शालिनी कुमारी**

**विषयप्रवेशः —**

वेदेषु प्राप्येषु आख्यानेषु रामायण-महाभारत-पुराणानां रचना जाताः। दार्शनिकसूक्तेभ्यः दर्शनशास्त्रस्य, धर्मसूत्रेभ्यः धर्मशास्त्रस्य अर्थशास्त्रस्य च, अर्थवादात्मकसूक्तेभ्यः काव्यसाहित्यमपि यथावत् प्रवर्तितम्। एवमेव ऋग्वेदाथर्ववेदाभ्यां आयुर्वेदः, यजुर्वेदात् धनुर्वेदः (सैन्यविज्ञानम्), सामवेदात् गान्धर्ववेदः, अथर्ववेदात् अर्थशास्त्रं शिल्पशास्त्रं च समुत्पन्नम्।

वेदाङ्गेभ्यः गणितशास्त्रं, खगोलविज्ञानम्, ज्योतिषशास्त्रं, आयुर्विज्ञानम्, रसायनशास्त्रम्, भौतिकी, शिल्पविद्या चोत्तरकाले विकासमगच्छन्। एतेषां विज्ञानविषयाणां मध्ये गणितम्, आयुर्विज्ञानम्, खगोलविज्ञानमित्येते विषयाः विस्तारयुक्ताः, सुस्पष्टाः, प्रमाणसमन्विताश्च दृश्यन्ते। संस्कृतवाङ्मये अपि कतिपयेषु स्थलेषु वैज्ञानिकचिन्तनानि दृश्यन्ते यानां तात्पर्यं सूक्ष्मविमर्शेनैव सुस्पष्टं भवति।[1]

सैद्धान्तिकविज्ञानदृष्ट्या षट्शतानाम् ईसापूर्वे बोधायनेन शुल्बसूत्रे वृत्तस्य त्रिभुजस्य च क्षेत्रफलसिद्धान्तः निरूपितः, यः रेखागणिते प्रसिद्धस्य पाइथागोरसप्रमेयस्य सदृशः सञ्जातः। आर्यभट्टप्रथमेन पञ्चम्यां शताब्द्यां 'आर्यभट्टीयम्' नाम ग्रन्थे परिधिव्यासानुपातस्य स्थिराङ्करूपेण मूल्यनिर्णयः कृतः, यः अधुनातने युगे 'पाइ' इत्याख्यया प्रसिद्धः। तस्यानुगुण्येनैव भारतदेशे कुट्टकसिद्धान्तस्य विकासः जातः, यः षोडशशताब्द्यादारभ्य 'Indeterminate Equation' इत्युपनाम्ना ख्यातः।[2] वराहमिहिरः (५०५ ई.) 'बृहत्संहितायाम्' भूगोलम्, उल्काविज्ञानम्, वनस्पतिविज्ञानम्, कृषिविज्ञानम्, अभियान्त्रिकीं, प्राणिविज्ञानं च विस्तरेण प्रतिपादितवान्।

**विषय-विवेचनम् —**

आधुनिककाले विज्ञानाध्ययिनां मध्ये एषा भ्रान्ता धारणा दृश्यते यत् आधुनिकविज्ञानं केवलं पाश्चात्यजगतो दत्तम् इति। वस्तुतः आधुनिकविज्ञानस्य अनेकाः सिद्धान्ताः प्राचीनसंस्कृतग्रन्थेषु प्रतिपादितविवेचनाधारिताः सन्ति, येषां किञ्चन उदाहरणानि अत्र प्रदत्तानि सन्ति। न्यायदर्शने वर्णितसिद्धान्ताः आधुनिकयुगे सर्वथा सर्वदा लाभकार्युपयोगी च पुरपि धिक्! इयं ज्ञानपरम्परां वर्षैः उपेक्षितम्। अर्थशास्त्रस्य प्रणेता आचार्यकौटिल्यः कथयति यत्, न्यायदर्शनं सर्वेषाम्मनुष्याणां कृते औपकारिकं। त्रय्यादिविद्यानां प्रधानताप्रधानतां विविधयुक्त्या निर्धारयतीं आन्वीक्षिकीं विद्यां लोकोपकारकं, सुखदुःखसमन्वितं बुद्धिं अवस्थापयति, चिन्तने विचारणे वदने कार्यकुशलतायां च सक्षमो। एतस्मादुक्तम् –

> **"प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।**
> **आश्रयः सर्वधर्माणां शाश्वदान्विक्षिकी मता॥"**[3]

एतदान्विक्षिकी विद्या सर्वदा सर्वेषांविद्यानां प्रदीपः सर्वेषांकर्मणामुपायो तथा च आश्रयो सर्वेषांधर्मणाम्। कणादः ६०० ई.पू. मध्ये वैशेषिकदर्शने परमाणुवादस्य सिद्धान्तम् उपस्थाप्य अवोचत् यत् परमाणुः अविभाज्यः च दिग्रहितः च अस्ति। पदार्थानां सप्त विभागेषु वैशेषिकदर्शने स्पष्टतया उक्तम् यत् पदार्थानां विशेषगुणाः विश्ववस्तूनां परिचायकाः भवन्ति।[4] अद्यतनवैज्ञानिकाः अपि एषमेव तथ्यं एवं वदन्ति — **“Spectrum is the language of atoms.”**[5] अतः परमाणुवादस्य सिद्धान्तः न्यायवैशेषिकशास्त्रस्य प्रमुखा दानं इति कथयितुं शक्यते।

पीलुपाकसिद्धान्तः अपि कणादेन एव प्रतिपादितः यः आधारभूतः भूत्वा आधुनिकभौतिकशास्त्रे Kinetic theory of Gases इति विकसितः अस्ति। कणादस्य तुल्यतया अत्र अपि उक्तम् यत् Molecule प्रथमतः भज्यते, ततः ऊष्मायाः प्रवेशः भवति, पश्चात् पूर्वरूपेण एव आगच्छति। एषः एव कार्यः अद्यतनवैज्ञानिकैः Thermo-dynamic Theory इत्यनेन निरूप्यते।[6]

सहस्रावधिपूर्वम् आर्षग्रन्थे सूर्यसिद्धान्ते गुरुत्वाकर्षणस्य विस्तृतं विवेचनम् अपि दृश्यते — नोदबिन्दौ स्थितः अदृश्यदेवताः ग्रहान् अदृश्यरश्मिभिः आकर्षन्ते।[7] **“अदृश्यरूपाः कालस्य मूर्तयो भगणाश्रिताः।”** भास्कराचार्यः ११५० ई. मध्ये स्वस्य सिद्धान्त-शिरोमणिग्रन्थे पृथिव्यां गुरुत्वाकर्षणस्य प्रवृत्तिम् अविवेचयत्। पृथिव्याः आकर्षणशक्तिः अस्ति। अस्य शक्तेः प्रभावेन आकाशाभिमुखं क्षिप्तं वस्तु पृथिव्यां पतितमिव दृश्यते। यथार्थतः पृथिव्यैव तद् स्वाभिमुखं आकर्षति यतः आकाशः सर्वतः समः एव।[8] न्यायवैशेषिकदर्शनस्य तर्कसंग्रहग्रन्थे (१६ शताब्दी) अपि स्पष्टः उल्लेखः दृश्यते **‘आद्यपतनासमवायिकारणत्वं गुरुत्वम्।’**[9] पाश्चात्यजगति न्यूटननामकः आधुनिकवैज्ञानिकः (१६५२– १७२७ ई.) यः गुरुत्वाकर्षणस्य सिद्धान्तम् उपस्थापितवान्, तस्य उल्लेखः आकर्षणशक्तिरूपेण सहस्रवर्षपूर्वमेव भारतीयज्ञानपद्धत्याम् अस्ति स्म।[10] भारतीयमनीषिणः सततं तत्त्वचिन्तनं कुर्वन्तः आसीत्। तैः उठितप्रश्नानामुत्तरान्वेषणे अनेके दार्शनिकाः, वैयाकरणाः च तदा वैज्ञानिकाः च प्रवृत्ताः आसन्। एतस्मात् परिणामतः पदार्थ, द्रव्य, अणु, परमाणु, गति, विराम, ब्रह्माण्डरचना इत्यादिषु विषयेषु भारतीयर्षिभिः सूक्ष्मं गहनं च विवेचनम् कृतम् ये अद्यापि महत्त्वपूर्णानि सन्ति। वैशेषिकदर्शनस्य (५०० ई. पू.) ऋषिभिः विशेषपदार्थवाददृष्ट्या अनेकाः भौतिकविज्ञानसम्बद्धाः मौलिकाः सूत्राणि प्रदत्तानि।[11] पदार्थज्ञानविषये तैः साधर्म्यवैधर्म्यपद्धत्योः आश्रयणेन वैज्ञानिकदृष्टिः प्रदर्शिता।[12]

डाल्टनस्य परमाणुसिद्धान्तात् सहस्रवर्षपूर्वम् महर्षिः कणादः अस्य समीक्षां कृतवान्। परमाणु, अणु, द्वयणु, त्रसरेणु इत्यादीनां विवेचनम्, गतिसिद्धान्तः, गुरुत्वाकर्षणनियमः च बीजरूपेण महर्षिणा कणादेन एव निरूपितम्।[13]

न्यायवैशेषिके प्रकाशस्य प्रकृतिः, ऊर्जायाः विकिरणम्, ध्वनि-संचरणम्, दिक्, कालस्य संकेताः च दृश्यन्ते, येषां पुष्टिर्नूतन-विज्ञानस्य धारणाभिः अपि क्रियते। आकाशविषये अपि संस्कृत-वाङ्मये कणीयभौतिकी, खगोलिकी, नक्षत्रविद्या, ऊष्मागतिकी, प्रकाशपरावर्तनम्, अपवर्तनम्, गतिनियमाः इत्यादीनां वैज्ञानिक-विषयानां सूक्ष्मस्थूलविकासः द्रष्टव्यः।[14]

दार्शनिकः श्रीधराचार्यः अवदत् यत् द्रव्यं सर्ववस्तूनामा-श्रयभूतम्।[15] महर्षिः कणादः अपि अवदत् यत् क्रियागुणयोः समवायिकारणम् द्रव्यमेव। वैशेषिकदर्शने पृथिवी, जलम्, तेजः, वायुः अवयव्यरूपेण अनित्यद्रव्याणि, किन्तु परमाणुरूपेण नित्यः। आकाशः, कालः, दिक्, आत्मा च नित्यत्वेन स्वीक्रियन्ते, यतः एषां विखण्डनम् न शक्यते। ज्ञायते च यत् प्रत्येकवस्तु, गुणः च क्रिया च आकाशे, काले, दिक्षु च स्थितिं अपेक्षते। वैशेषिके चेतनाधिकारिणं (आत्मा), मध्यस्थोपकरणम् (मनः), पञ्च बाह्यकरणानि (ज्ञानेन्द्रियाणि) च तत्त्वज्ञानाय अनिवार्याणि इति अपि प्रतिपाद्यते। महर्षिणा कणादेन उक्तं यत् पृथिवी, जलम्, तेजः, वायुः च एषां मूलतत्त्वम् परमाणुः अस्ति। सः सूक्ष्मतमः अवयवः, अविभाज्यः, नित्यः, अतीन्द्रियः च। एतेषां संख्या अनन्ता।[16] डाल्टनस्य परमाणुसिद्धान्तात् सहस्रवर्षपूर्वमेव एतेषां तथ्यानां ज्ञानम् भारतीयमनीषिभ्यः आसीत्।

न्यायवैशेषिके द्रव्ये ऊष्माप्रभावस्य अध्ययनम्, पीलुपाकवादः, पिठरपाकवादः च वर्णितौ। पीलुपाकवादे ऊष्माचालनं संवहनं च, पिठरपाकवादे ऊष्माविकिरणस्य झलकः दृश्यते। महर्षिणा कणादेन ‘निशेषास्त्वनन्ताः’ इति उक्तेन प्रतिपादितम् यत् प्रत्येकपदार्थस्य विशेषगुणाः अनन्ताः।[17] अद्यतनविज्ञानमपि मन्यते यत् प्रत्येक-पदार्थस्य गलनांकः, क्वथनांकः, स्पेक्ट्रम् च समानम् न भवति। ध्वनिप्रसारणविषये न्यायदर्शने द्वे तरङ्गयोः उद्धरणे दृश्येते, यानि अनुप्रस्थतरङ्गाणाम् अनुदैर्ध्यतरङ्गाणां च उदाहरणानि। गति-विवेचनं कुर्वन् वैशेषिकदर्शने स्थितिस्थापकसिद्धान्तः न्यूटनस्य तृतीयनियमस्य, जडत्वकल्पनायाः, प्रत्यास्थतायाश्च झलकं ददाति। भारतीयमनीषिभिः प्रकाशस्य गति अपि ज्ञातम् यत् आधुनिक-गणनायाः ३×१०⁸ मी./से. तुल्यमेव। वैशेषिके उत्क्षेपणम्,

अवक्षेपणम्, आकुञ्चनम्, प्रसारणम्, गमनम् इत्यादयः पञ्च कर्मभेदाः निर्दिष्टाः, ये अद्यतनविज्ञाने बलपरिभाषायाः आधाररूपेण स्वीक्रियन्ते। अत्रैव त्वरणम् मंदनं च कल्पितम्। कर्मस्य अपरौ भेदौ नोदनम् अभिघातः च दाबः प्रहारः च भौतिकशास्त्रे सङ्केतितः। न्यायवैशेषिकदर्शने बलस्य कारणेन विस्थापनं भवति चेत् कार्यं सञ्जायते इति स्पष्टतया दर्शितम्। किन्तु अत्र निमित्तकारणस्य — चेतनप्रयासस्य अपि अनिवार्यता प्रतिपादिता।

**निष्कर्षः —**

संस्कृतवाङ्मये जीवनमूल्यानां सह वैज्ञानिकज्ञानस्य — गणित, खगोलविज्ञानम्, रसायनशास्त्रम्, भौतिकशास्त्रम्, वनस्पतिशास्त्रम्, आयुर्विज्ञानम्, अभियान्त्रिकीप्रौद्योगिकी च, प्राणिविज्ञानम्, पशुचिकित्सा, कृषिविज्ञानम्, पर्यावरणविज्ञानम्, सैन्यविज्ञानम् च विपुलरूपेण विद्यमानम्, यस्य उपादेयता अद्यापि अक्षुण्णा अस्ति। आधुनिकविज्ञानस्य सिद्धान्तानाम् अनुप्रयोगानां च उल्लेखः अस्माकं प्राचीनसंस्कृतग्रन्थेषु दृश्यते तथा तेषां आधुनिकतमविज्ञाननियमैः समन्वयः शक्यते। न केवलम् एतावत्, किन्तु आर्षग्रन्थानां विशदाध्ययनम् अवलोकनम् विवेचनं च कृत्वा नवानां सिद्धान्तानामपि संकल्पना साध्या।

अतः भारतीयज्ञानपद्धत्यां विद्यमानं ज्ञानविज्ञानं सर्वाङ्गीण-दृष्ट्याधारितम् अस्ति, यदा आधुनिकज्ञानस्य दृष्टिः विशेषज्ञ-तामूलिका एव। एतस्मात् कारणात् प्राचीनसंस्कृतवाङ्मये वैज्ञानिक-तथ्यानि भिन्नभिन्नस्रोतिषु एव दृश्यन्ते।

**सन्दर्भ ग्रन्थः -**


1 संस्कृतवांग्मये विज्ञानम्, रहसबिहारी द्विवेदी, २००२

2 संस्कृतवांग्मये विज्ञानम्, श्रीकृष्णसेमवालः, १९९९

3 कौटिलीय अर्थशास्त्रः, पं उदयवीर शास्त्री

4 वैशेषिकसूत्रम्, कणाद, सं. नारायण मिश्रः

5 The physics, Dongra,N.G.

6 वही

7 संस्कृतवांग्मये विज्ञानम्, श्रीकृष्णसेमवालः, १९९९

8 भारतीयज्योतिषशास्त्रस्येतिहासः, दाहालः, लोकमणि, वाराणसी, १९९०

9 तर्कसंग्रहः, (तर्कदीपिकाटीका), अन्नंभट्ट, कांशीराम, दिल्ली, २०१०

10 भारतीयविज्ञान के कर्णधार, सत्य प्रकाशः, प्रयागराज

11 वैशेषिकसूत्रोपस्कारः, शंकरमिश्रः, ढुण्ढिराजशास्त्री, वाराणसी

12 सप्तपदार्थी, सदाशिव, व्या. जिनवर्धनसूरिः अहमदाबाद, १९७०

13 वैशेषिक दर्शनः, विद्योदयभाष्य, उदयवीर शास्त्री, १९७२

14 संस्कृतवांग्मये विज्ञानम्, रहसबिहारी द्विवेदी, २००२

15 नयायकन्दली, श्रीधरः, हि॰वया॰ दुर्गाधर झा, वाराणसी, १९९७

16 वैशेषिक दर्शनः, विद्योदयभाष्य, उदयवीर शास्त्री,१९७२

17 वैशेषिक दर्शन में पदार्थ निरूपण, शशिप्रभा कुमार, दिल्ली,२०१३